कास्रवयुक्ता न सिद्धिमुपयान्ति । भवन्ति चात्र । यस्य पालिद्वयमपि कर्णस्य न भवेदिह । कर्णपीठं समे मध्ये तस्य विद्धा विवर्द्धयेत् । बाह्यायामिह दीर्घायां सन्धिराभ्यन्तरो भवेत् । आभ्यान्तरायां दीर्घायां बाह्यसन्धिरुदाहृतः । एकैवतु भवेत्पालिः स्थूला पृथ्वी स्थिरा च या । तां द्विधा पाटयित्वा तु छित्त्वा चोपरि सन्धयेत् । गण्डादुत्पाट्य मांसेन सानुबन्धेन जीवता । कर्णपालिमपालेस्तु कुर्य्यान्निर्लिख्य शास्त्रवित् । अतोऽन्यतमं बन्धं चिकीर्षुरग्रोपहरणीयोक्तोपसंभृतसम्भारं विशेषतश्चात्रोपहरेत् सुरां मण्डं क्षीरमुदकं धान्याम्लं कपालचूर्णञ्चेति । ततोऽङ्गनां पुरुषं वा ग्रथितकेशान्तं लघु भुक्तवन्तमाप्तैः सुपरिगृहीतञ्च कृत्वा बन्धमुपधार्य्य छेद्यभेद्यलेख्यव्यधनैरुपपन्नैरुपपाद्य कर्णशोणितमवेक्षेत तद्दुष्टमदुष्टं वेति । तत्र वातदुष्टे धान्याम्लोष्णोदकाभ्यां, पित्तदुष्टे शीतोदकपयोभ्यां, श्लेष्मदुष्टे सुरामण्डोष्णोदकाभ्यां प्रक्षाल्य कर्णौ पुनरवलिख्यानुन्नतमहीनमविषमञ्च कर्णसन्धिं सन्निवेश्य स्थितरक्तं सन्दध्यात् । ततो मधुघृतेनाभ्यज्य पिचुप्लोतयोरन्यतरेणावगुण्ठ्य सूत्रेणानपगाढमशिथिलञ्च बद्धा कपालचूर्णेनावकीर्य्याचारिकमुपदिशेद्द्विव्रणीयोक्तेन विधानेनावचरेत् । भवतश्चात्र । विघट्टनं दिवास्वप्नं व्यायाममतिभोजनम् । व्यवायमग्निसन्तापं वाक्श्रमञ्च विवर्ज्जयेत् । आमतैलपरोषेकं त्रिरात्रमवचारयेत् । ततस्तैलेन संसृष्टं त्र्यहादपनयेत् पिचुम् । न चासंशुद्धरक्तमतिप्रवृत्तरक्तं वा सन्दध्यात् । स हि वातदुष्टे रक्ते रूढोऽपि परिपुटनवान्, पित्तदुष्टे दाहपाकरागवेदनावान्, श्लेष्मदुष्टे स्तब्धः कण्डूमान्, अतिप्रवृत्तरक्ते श्यावशोफवान् । क्षीणोऽल्पमांसो न वृद्धिमुपैति । स यदा सुरूढो निरुपद्रवः सवर्णो भवति तदैनं शनैःशनैरभिवर्द्धयेत् । अतोऽन्यथा संरम्भदाहपाकरागवेदनावान् पुनश्छिद्यते वा । अथास्याप्रदुष्टस्याभिवर्द्धनार्थमभ्यङ्गः । तद्यथा गोधाप्रतुदविष्किरानूपौदकवसामज्जानौ पयःसर्पिस्तैलं गौरसर्षपजञ्च यथालाभं सम्भृत्यार्कालर्कबलातिबलानन्तापामार्गाश्वगन्धाविदारिगन्धाक्षीरशुक्लाजलशूकमधुरवर्गप्रतिवापं तैलं वा पाचयित्वा स्वनुगुप्तं निदध्यात् । स्वेदितोन्मर्दितं कर्णं स्नेहेनानेन योजयेत् । अथानुपद्रवः सम्यक् बलवांश्च विवर्द्धते । यवाश्वगन्धायष्ट्याह्वैस्तिलैश्चोद्वर्त्तनं हितम् । शतावर्य्यश्वगन्धाभ्यां पयस्यैरण्डजीवनैः । तैलं विपक्वं सक्षीरमभ्यङ्गात् पालिवर्द्धनम् । ये तु कर्णा न वर्द्धन्ते विधिनानेन योजिताः । तेषामपाङ्गदेशे तु कुर्य्यात् प्रच्छानमेव तु । बाह्यच्छेदं न कुर्व्वीत व्यापदस्तु ततो ध्रुवाः । बद्धमात्रन्तु यः कर्णं सहसैवाभिवर्द्धयेत् । आमकोशी समाध्मातः क्षिप्रमेव विमुच्यते । जातरोमा सुवर्त्मा च श्लिष्टसन्धिः समः स्थिरः । सुरूढोऽवेदनो यस्तु तं कर्णं वर्द्धयेच्छनैः । अमिताः कर्णबन्धास्तु विज्ञेयाः कुशलैरिह । यो यथा सुनिविष्टः स्यात्तं तथा विनियोजयेत्” । एवं वेधप्रकाराभिज्ञेनैव भिषजा कर्णवेधः कारयितव्यः

**कर्णशष्कुली** स्त्री कर्णस्य शष्कुलीव । १कर्णगोलके, “अवलम्बितकर्णशष्कुलीकलसीकं रचयन्नवोचत” नैष० । “कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रम्” मुक्ता० २तन्मध्याकाशे च ।

**कर्णशूल** न०६त० । कर्णरोगभेदे । कर्णगतरोगशब्दे विवृतिः

**कर्णशोभन** त्रि० कर्णं शोभयति शुभ–णिच्–ल्यु । कर्णाभरणे “उत नः कर्णशोभना पुरूणि” ऋ० ८,७८,३,

**कर्णश्रव** त्रि० श्रूयते श्रवः शब्दः कर्णेन श्रवः श्रवणयोग्यः शब्दोयत्र । श्रवणयोग्यशब्दधारे वय्वादौ “कर्णश्रवेऽनिले रात्रौ दिवा पांशुसमूहने” मनुः ।

**कर्णसंस्राव** पु० कर्णरोगभेदे कर्णगतरोगशब्दे विवृतिः ।

**कर्णसू** स्त्री कर्णं सूते सू–क्विप् । पृथायां कुन्त्याम् तत्प्रसवकथा कर्णशब्दे उक्ता । कर्णजनन्यादयोऽप्यत्र ।

**कर्णस्फोटा** स्त्री कर्णे स्फोटो विदारणं यस्याः । (काणफाटा) लताभेदे राजनि० । “कर्णस्फोटा कटुस्तिक्ता हिमा च परिकीर्त्तिता । सर्व्वग्रहभूतविषदोषव्याधिविनाशिनी” राजनि०

**कर्णस्रोतस्** न० कर्णस्य स्रोत इव । कर्णमले

**कर्णस्रोतोभव** पु० कर्णस्रोतसो विष्णुकर्णमलाद्भवति भू–अच्, भवत्यस्मात् अपादाने अप् कर्णस्रोतो भवोयस्य वा । विष्णुकर्णमलोद्भूते मधुनामके कैटभनामके चासुरे । “कर्णस्रोतोभवञ्चापि मधुं नाम महासुरम् । तस्यैव तु कर्म्मोग्रं बुद्धिं समास्थितम् । ब्रह्मणोऽपचितिं कुर्व्वन् जघान पुरुषोत्तमः” भा० अनु० ६६अ० यथाचास्य विष्णुकर्णादुद्भवः तथा कैटभशब्दे वक्ष्यते ।

**कर्णहीन** त्रि० ३त० । १बधिरे बाधिर्य्यप्राप्तिश्च पापविशेषजन्या यथाह शाता०स० । “काकघातो कर्णहीनो दद्याद्गामसितप्रभाम्” । २सर्पे च पुंस्त्री चक्षुःश्रवस्त्वात्तस्य तथात्वम् । स्त्रियां जातित्वात् ङीष् ।